# Shri Sita Ashtottarashatanama Stotram 4

# શ્રી સીતા અષ્ટોત્તરશતનામસ્તોત્રમ્ ૪

## Document Information

Text title : sItAShTottarashatanAmastotram 4

File name : sItAShTottarashatanAmastotram4.itx

Category : devii, aShTottarashatanAma, sItA, raama, devI

Location : doc_raama

Transliterated by : P R Ramamurthy

Proofread by : P R Ramamurthy

Acknowledge-Permission: lalitaalaalitah http://stotram.lalitaalaalitah.com

Latest update : March 10, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 16, 2024

*sanskritdocuments.org*

# શ્રી સીતા અષ્ટોત્તરશતનામસ્તોત્રમ્ ૪

ૐ સીતા પતિવ્રતા દેવી મૈથિલી જનકાત્મજા ।
અયોનિજા વીર્યશુલ્કા શુભા સુરસુતોપમા ॥ ૧॥

વિદ્યુત્પ્રભા વિશાલાક્ષી નીલકુઞ્ચિતમૂર્ધજા ।
અભિરામા મહાભાગા સર્વાભરણભૂષિતા ॥ ૨॥

પૂર્ણચન્દ્રાનના રામા ધર્મજ્ઞા ધર્મચારિણી ।
પતિસમ્માનિતા સુભ્રૂઃ પ્રિયાર્હા પ્રિયવાદિની ॥ ૩॥

શુભાનના શુભાપાઙ્ગી શુભાચારા યશસ્વિની ।
મનસ્વિની મત્તકાશિન્યનઘા ચ તપસ્વિની ॥ ૪॥

ધર્મપત્ની ચ વૈદેહી જાનકી મદિરેક્ષણા ।
તાપસી ધર્મનિરતા નિયતા બ્રહ્મચારિણી ॥ ૫॥

મૃદુશીલા ચારુદતી ચારુનેત્રવિલાસિની ।
ઉત્ફુલ્લલોચના કાન્તા ભર્તૃવાત્સલ્યભૂષણા ॥ ૬॥

સ્વભાવતનુકા સાધ્વી  પદ્માક્ષી પઙ્કજપ્રિયા ।
વિચક્ષણાઽનવદ્યાઙ્ગી મૃદુપૂર્વાભિભાષિણી ॥ ૭॥

અક્લિષ્ટમાલ્યાભરણા વરારોહા વરાઙ્ગના
સતી કમપત્રાક્ષી મૃગશાવનિભેક્ષણા ॥ ૮॥

મહાકુલીના બિમ્બોષ્ઠી પીતકૌશેયવાસિની
વીરપાર્થિવપત્ની ચ વિશુદ્ધા વિનયાન્વિતા ॥ ૯॥

સુકુમારી સુમધ્યા ચ સુભગા સુપ્રતિષ્ઠિતા
સર્વાઙ્ગગુણસમ્પન્ના સર્વલોકમનોહરા ॥ ૧૦॥

તરુણાદિત્યસઙ્કાશા તપ્તકાઞ્ચનભૂષણા ।
સત્યવ્રતપરા ચૈવ વરા હરિણલોચના ॥ ૧૧॥

શ્યામા વિશુદ્ધભાવા ચ રામપાદાનુવર્તિની ।
યશોધના ઉદારશીલા વિમલા ક્લેશનાશિની ॥ ૧૨॥

અનિન્દિતા સુવૃત્તા ચ રામસ્ય હૃદયપ્રિયા ।
આર્યા ચ સુવિભક્તાઙ્ગી વિનાભરણશોભિની ॥ ૧૩॥

માન્યા કાન્તસ્મિતા ચૈવ કલ્યાણી રુચિરપ્રભા ।
સ્નિગ્ધપલ્લવસઙ્કાશા જામ્બૂનદસમપ્રભા ॥ ૧૪॥

અમલા શીલસમ્પન્ના ઇક્ષ્વાકુકુલનન્દિની ।
ભદ્રા શુદ્ધસમાચારા વરાર્હા તનુમધ્યમા ॥ ૧૫॥

પ્રિયકાનનસઞ્ચારા સુકેશી ચારુહાસિની ।
હેમાભા રાજમહિષી શોભના રાઘવપ્રિયા ॥ ૧૬॥

અષ્ટોત્તરશતં દેવ્યાઃ સીતાયાઃ સ્તોત્રમુત્તમમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૭॥

ઇતિ શ્રી સીતા અષ્ટોત્તરશતનામસ્તોત્રં ૪ સમ્પૂર્ણમ્ ।

*Shri Sita Ashtottarashatanama Stotram 4*
pdf was typeset on July 16, 2024

Please send corrections to *sanskrit@cheerful.com*